## ।। अथ षट्षष्टितमोऽध्यायः ।। chapter 66

मांधातोवाच :- यावद्बयाभिहिली ब्रुवन् यावत्परीक्षितो नृपः[1] ।।
तावद्वसुमती दिव्या मूर्तिः स्थास्यति भूतले ।। १

यातायामथ तस्यां तु मूर्तौ तिग्मद्युतेर्दिवम् ।।
नष्टेषु सर्वरत्नेषु कलौ प्राप्ते सुदारुणे ।। २

कथं श्रीमालिनो विप्रा वर्तिष्यन्ते तपोधन ।।
सर्वमेतन् ममाचक्ष्व त्रिकालज्ञो भवान् यतः ।। ३

वसिष्ठ उवाच :- एतत्[1] पुरा महाराज पुलस्त्यो मुनिसत्तमः ।।
बवाले: कथयामास श्रीमाले वसतोऽखिलम् ।। ४

तदोऽहं कथयिष्यामि सर्वं गुरुमुखात्[2] ।।
शृणु चैकमना राजन् भविष्यद् ज्ञानमुत्तमम् ।। ५

कश्यपस्य कुले जातः काश्यपोऽभून् महातपाः
विषापहारिणी विद्या तेन प्राप्ता महेश्वरात् ।। ६

करिष्यन्त्येतपस्तस्य श्रीमाले चिरजीविनः ।।
अन्तर्हितानि रत्नानि भविष्यन्ति कलेर्वशात् ।। ७

-०-

१ बी एव मेतत्
२ घ ई पुस्तकेषु पर्यन्तानां पाठो यथा :-
शृणुष्वैकमना भूत्वा भविष्यद्ज्ञानमुत्तमम् । कश्यपस्य कुलेजातः काश्यपो
भूत् महातपाः ।।
३ बी विषापहारिणी विद्या तेन प्राप्ता महेश्वरात् । करिष्यन्स्तपस्तस्य
श्रीमाले चिरंजीविनः ।।
१ ए नृप

अथ स निर्धनं[1] दृष्ट्वा श्रीमालं दिव्यवत्सलम्[2] ।।
चिन्तयिष्यति विप्रर्षिर्निर्विण्णोऽथमुहुर्मुहुः ।। ८

एतत्तदेवविप्राणां श्रीमालं देवपत्तनम् ।।
यत्पुरा श्रीसमादेशान्निर्मितं विश्वकर्मणा ।। ९

निहिता निधयो यत्र स्वयं देव्या तथा श्रिया ।।
इच्छाप्रदायिनी यत्र श्रीरेवासीत्स्वयं किल[3] ।। १०

एतत्तदेव विप्राणां श्रीमालं नाम पत्तनम् ।।
क्षीरोदमथनाज्जाता यत्र श्रीः स्थितिमाददनोत् ।। ११

एतत्तदेव विप्राणां श्रीमालन्नामपत्तनम् ।।
यत्रोर्व्यां रत्नमानायां पुरा रत्नानि निर्ययुः ।। १२

अधुनैतत् प्रपश्यन्तः[4] कष्टं जीवामहे वयम् ।।
दुःखितं सर्वं नो हन्त घोरे[5] प्राप्ते कलौ युगे ।। १३

-o-o-

१ बी तुच्छधनं

२ बी दैवपत्तनम् अतः पर पाठः यथा चिन्तयिष्यति--- दैवपत्तन् नास्ति ।।

३ बी श्री स्थितिमाननोत् ।।

४ बी प्रणश्यन्ति

५ ए घोर

१ ए नि

२ ए स्तथ

ना क्रियन्ते तथा यागास्तथा दानं न दीयते[१] ।
तथा महोत्सवा न स्युः श्रीमाले देववत्सले ।। १४

यतिष्ये तदहं नूनं अधुना क्रियया तथा ।।
यथा श्रीमालमापूर्णं भेवद् रत्नै र्भविष्यति ।। १५

यावत् कलियुगं घोरं वर्तिष्यन्ते[२ए] द्विजातय: ।।
यथा कृतानि वित्तानि भुञ्जन्तेना इतरेतरम् ।। १६

वसिष्ठ उवाच एवं चिन्तयतस्तस्य व्योमगा वाग्भविष्यति ।।
मेघदुंदुभिर्गम्भीरा[२ए] कोकिला क्लोभाषिणी ।। १७

चिन्तामिमां मुने मुञ्च याहि वै हास्तिनं पुरं
[३ए] अथव तदाकोद्धर्धीत् श्रृंगिशापात्परीक्षितम् ।। १८

माहेश्वरेण मन्त्रेण विषं तस्याशु नाशय ।।
प्रसन्न: स तु भूपाल श्चिन्तां ते व्यपनेष्यति ।। १९

वसिष्ठ उवाच:- एवं निशम्य स मुनि: काश्यपो विषनाशकृत् ।।
पाण्डवेयपुरं शिष्यै: सह शीघ्रं प्रयास्यति ।। २०

-०-

१ बी यथा कृतानि वित्तानि भुंजाना इतरेतरे ।
बी यथा श्रीमाल मापूर्णं भेते ----- द्विजातय: । नास्ति
२ बी ई अथ तु तक्षकदष्टं ।
१ ए वर्तिष्यन्ति
२ ए की
३ ए अथप्रभृतिकोदष्टं

मत्वा तमथ गच्छन्तं कालाहूष्ट: सलक्षक: ॥
दत्वा बहूनि रत्नानि मुनिं व्यावर्तयिष्यति ॥ २१

तर्पयिष्यन्ति ते रत्नै: श्रीमालमथ काश्यप: ॥
सुहृदो नृप सर्वांश्चै भरिष्यंति मुदायुतान् ॥ २२

सप्ताहादथ संदष्टं तक्षकेण परीक्षितम् ॥
निशम्य काश्यपो राजन् विद्वान्ननुशयिष्यति[1] ॥ २३

हन्त रत्नै: परिक्रीत: पाण्डवेयो महीपति: ॥
बन्मया धर्मधौरेयस्तदेतन्न्दर्हितं कृतम् ॥ २४

अस्थिराणि सुरत्नानि गृहीतानि फणीश्वरात् ॥
जीवयित्वा मृतं भूपं न यश: स्थिरमर्जितम् ॥ २५

असामान्यप्रभावापि सा विद्याप्यर्थता कृता ॥
यया विश्वचमत्कारि नाकारि[2] किमपि क्षितौ ॥ २६

अनया विद्यया राज्ञि मयादत्तं न जीवितम् ॥
चिरकालोपभोग्यं वै कंचुक्यां नार्पितं धनम् ॥ २७

-०-

१ वी विद्वान राजन् ! अनुशयिष्यति ।

१ ए मत्वाऽथ तमथ गच्छन्तं

२ ए माकारि

किं करोमि क्व गच्छामि कथं शान्तिर्भवेन् मम् ।।
इति चिन्ताभिभूतस्य तस्य संपत्स्यते मतिः ।। २८

विद्याराशीप्रभावेण करिष्यामि तथाधुना ।।
यथाभवेत् स्थायिकीर्ति बंधूनां[1] चाक्षयं धनम् ।। २९

वसिष्ठ उवाच :- एवं विचिन्त्य राजेन्द्र श्रीमाली काश्यपो मुनिः ।।
तत्रोपविष्टान् विप्रान् स्वशिष्यानिदमब्रवीत् ।। ३०

काश्यप उवाच :- कथं स कौरवो राजा तक्षकेण-फणाभृता ।।
दष्टः कालवशात् विप्रास्तं प्रकोप्य तु शृंगिणम्[2] ।। ३१

चिरन्तनकृता रक्षा कुत्रासीत् सन्नरेश्वरः ।।
तन्मेतच्चक्षध्वत तस्य वृत्तं महात्मनः ।। ३२

वसिष्ठ उवाच :- इत्युक्तास्ते च विद्वांसः शिष्याः परीक्षितस्य च ।।
सर्वं निवेदयिष्यन्ति वृत्तं जातं तु तत्र वै ।। ३३

शिष्याऊचुः- अयं सरो विनिर्माय शृंगिशापभयान्नृपः[1ए] ।।
उपर्युपरि विस्तीर्णाः[2ए] शिला बहुबीन्धवेशयत् ।। ३४

-०-

२ बी दष्टः कालवशाद विप्रं तं प्रकोप्य च शृं गिणाम्
१ बी यथा स्थायी भवेद् राजाबन्धूनां चाक्षयं धनम्
१ ए न्नूपः
२ ए शीला

तत्रैकं सुरम्यं[1] स्तम्भं कारयामास भूपतिः ॥
तस्योपरि गृहं रम्यं सौवर्णकलशान्वितम् ॥ ३५

नीरन्ध्रसंधिहीनं न निरपेक्षं परीक्षितः ॥
औषधीचन्दनालिप्तं मान्त्रिकैः परिमन्त्रितम् ॥ ३६

पाण्डवेयो नृपस्नात्वा स्वयं तस्योपरि स्थितः ॥
कण्ठे गारुडरत्नानां स्रजं कृत्वा विषापहाम् ॥ ३७

घण्टिका लम्बमाना च दत्ता लोहमयी त्रिवृत् ॥
अन्तराले नृपश्रेष्ठ स्तम्भस्य च गृहस्य च ॥ ३८

सरसः परितो मुक्ता रक्षपालाः सहस्रशः ॥
वर्जयित्वा द्विजश्रेष्ठान् न प्रवेशाजनदर्शनम् ॥ ३९

अतस्ते वै महात्-मानो धर्माधारा मनीषिणः ॥
फलामादाय पश्यन्ति सर्वत्र[2] ब्रह्मचारिणः ॥ ४०

तस्यैवं वर्तमानस्य तदागात् सप्तमं दिनम् ॥
पाण्डवेनाथ मर्तव्यं तक्षकाच्चात्र भूमिप(इतिशापु) ४१

-०-०-

१ बी तत्रे काश्ममयं स्तम्भं
२ बी तं प्रपश्यन्ति सर्वस्मात्कुव्या

अथ तस्य दिनस्यान्ते लम्बमाने दिवाकरे ।।
आत्मानं दर्शयामास प्राप्तानां कृमारिणाम् ।। ४२

नृपः स्तम्भगृहारूढो जीवितोऽस्मीति चिन्तयन् ।।
कृमारिफलेभ्योऽथ [1] निर्ययौ भूमिविग्रहः ।। ४३

तक्षकः क्रूरकर्मासौ विदशन्नृपतिं गले ।।
ततो ज्वाला विनिष्क्रान्ता तक्षकस्य मुखात्तदा ।। ४४

सह स्तम्भगृहेणैव तं ददाह परीक्षितम् ।।
ज्वालाग्रादथ निर्गत्य तक्षको हिंगुलद्युतिः ।। ४५

शंसन्तमिव कुर्वाणो दिवः प्राप्तोऽमरावतीम् ।।
हाहाकारः महानासीद्दष्टो राजा तदाहिना ।। ४६

शोकश्च सुमहान् लोके मृतं दृष्ट्वा परीक्षितम् ।।
एतत्ते कथितं ब्रह्मन् यथा दष्टः स कौरवः ।।
तवादेशादितः प्राप्तैः दृष्टोऽस्माभिरपि ध्रुवम् ।। ४७

१ ए निर्यंघौ

वशिष्ठ उवाच :- एवं निशम्य वचनं शिष्याणां समुनिस्तदा ।।
वल्गीतं द्रवीकृत्य तथोदुम्बरमादरात्[२ए] ।। ४९

शुक्रशोणितयोर्योगं परिकल्प्य वदिष्यति ।।
सरो लिखितमेतद्धा[१ए] सह राज्ञा परीक्षिता ।। ५०

विस्वरूपं करोम्येष्याश्चिरस्थाप्यं यशस्त्व[१] वै ।।
[२]यथेवं जीवयिष्यामि त्वयं राजा पुरा स्थित[३]: ।। ५१

इत्युक्त्वा स मुनि: शिष्यान् तस्मिन् सरसि काश्यप: ।।
क्षिप्त्वा रसं कुशाग्रेण चोत्करिष्यति तत्क्षत: ।। ५२

अथतस्मिन् समुत्पन्ने सुचित्रे सुमनोहरे ।।
सर्वे श्रीमालिनो विप्रास्तद्दृक्षन्ति कुतूहलात् ।। ५३

अथ ते काश्यपादेशान् मन्त्रैर्वेदत्रयोद्धृतै: ।।
यावदारोपयिष्यन्ति जीवं ता वदरिप्रिया ।। ५४

प्रत्यक्षाभिभूष भूपाल वर्षन्ती कुसुमोत्करान्[५]
एवं श्रीमालिनो विप्रान् महर्षिस्तं च काश्यपम् ।। ५५

-०-

१ बी विस्वरूपं करोम्येत-च्चिरस्थायि न संशय: ।।
२ समाप्ता क(सी) प्रति: । अपूर्णेयम् १५२ पृष्ठात्मिका
१ थं ई संस्थितम्
४ स्रं ई उत्करिष्यति तत्क्षणाम्
५ सं ई कुसुमोत्करै:
१ ए तमेद्धा
२ ए ततो

भविष्यति पुरं प्रीता विमानस्था करस्तले[१ए] ॥ ५६

श्रीरुवाच:- परीक्षयैव नृपतिः प्रीणितः काश्यपत्वया ॥
चित्रमूर्तिः[१] कृता येन जीवनाय शरीरिणाम् ॥
संकल्पो यस्त्वया पूर्वं परीक्षिज्जीवने कृतः ॥
सोयमित्थं न मिथ्याऽ[२ए]सीत्परिकल्पनया तव ॥ ५७

वरं वरय भद्रं ते मुने काश्यप मा चिरम् ॥
तव तुष्टा प्रदास्यामि नात्र कार्या विचारणा ॥ ५८

काश्यप उवाच :- वर्तन्त्वापनया कृत्वा देवि श्रीमालिनो द्विजाः ॥
एतत्पारिक्षितं विद्वं ख्यातिं गच्छतु भूतले ॥ ५९

देव्युवाच :- एतत्पारिक्षितं विद्वं श्रीमालात् प्रचरिष्यति ॥
सर्वत्रापि न संदेहश्चारित्राणि सतां यथा: ॥ ६०

वर्तितव्यमनेनैव द्विजैः श्रीमालवासिभिः ॥
प्राप्ते कलियुगे घोरे श्रेष्ठ मंतव्यद्भविष्यति : ॥ ६१

-o-

१ ख (डी) चित्रमूर्तिः
१ ए करस्थले
२ए मिथ्या
३ ए वर्तन्त्वापदनया

शुक्रशोणितसंयोगात्[1] पुत्रश्चायं द्विजोत्तम: ।।
ताराद्विम्बरयोर्योगे[2] दुक्षिणादिवमोस्तु च ।। ६२

ईदृश: पुत्रश्चो यत्र प्रपतिष्यति काश्यप ।।
न रोगा[3] न भयं नाधिस्तद्राष्ट्रे वै भविष्यति ।। ६३

वसिष्ठ उवाच :- अथ परीक्षिन्नृपति: काश्यपं प्रविवक्ष्यति ।।
जीवितोऽस्मि मुनिश्रेष्ठ कीर्त्या त्वत्कृतयानया ।। ६४

सर्वे पारीक्षिता युष्मान् पूजयिष्यन्ति भूभुज: ।।

वसिष्ठ उवाच :- अथदेवीसमाहूतस्तक्षको वाडवमूलात् ।।
श्रीमालमागत: प्रीतो विप्रान्वै वदिष्यति ।। ६५

तक्षक उवाच :- निर्वैरेणैव वर्तन्तां द्विजा: श्रीमालवासिन: ।। ६६

वसिष्ठ उवाच :- इतिदत्त्वा वरं देवी परीक्षिच्च स तक्षक: ।।
यथास्थानं प्रयास्यन्ति श्रीमालं नृपसत्तम ।। ६७

एवं श्रीमालिनो विप्रा: वर्तिष्यन्ते कलौ युगे ।
यावद्देवीमहालक्ष्मी: पूजां प्राप्स्यति भूतले ।। ६८

-०-

डी १ स तत्कपात
२ स (डी०) लोके
३ स (डी) रोगो

तत्र स्यात् तावदक्षय्यमन्यथा न यमेष्यति ॥
एतां या पुत्रोत्पत्तिदायिनी कथित मया ॥ ६९
शृणुयात् श्रद्धया युक्तस्तस्य श्रीः सर्वतोमुखी ॥ ७०

इति श्री स्कंद पुराणे एकाशीति साहस्र्यां
संहितायां तृतीय परिच्छेदे, बाल विभागे श्रीमाल माहात्म्ये
भविष्यदुपाख्यानंनाम षडशीतितमोध्याय: ॥